# 2021

## SANSKRIT — HONOURS

**Paper : CC-5**

**(Classical Sanskrit Literature – Drama)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 25)**

**Unit – I**

**1.** (a) अधोलिखितयोः यथेच्छ***मेकस्य*** मातृभाषया अनुवादः कार्यः। 5

(i) खगाः वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥

(ii) तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥

(b) अधोलिखितयोः यथेच्छ***मेकस्य*** **संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्यः। 6

(i) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम्॥

(ii) नैवेदानीं तादृशाश्चक्रवाका
नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
भर्तृस्नेहात् सा हि दग्धाप्यदग्धा॥

(c) अधोलिखितेषु ***त्रयाणा***मुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण देयम्। 2×3

(i) कुत आयातो ब्रह्मचारी? तस्य विद्याग्रहणं समाप्तं वा न वा?

(ii) 'धीरा कन्येयं दृष्टधर्मप्रचारा'— केनोक्तम्? का एव धीरा कन्या?

**Please Turn Over**

(iii) कथं वासवदत्ता न्यासरूपेण पद्मावतीसमीपे निक्षिप्ता?

(iv) किं व्युत्क्रम्य विधिः न गच्छति?

(v) कस्तावत् रुमण्वान्? स्वप्ननाटके कस्मिन्नङ्के स दृश्यते?

**Unit – II**

**2.** अधोलिखितयोः कस्यचित् ***एकस्य*** उत्तरं देयम्।

(a) स्वप्नदृश्यं कस्मिन्नङ्के लभ्यते? दृश्यमिदं संक्षेपेण वर्ण्यताम्। 1+7

(b) कासीद् घोषवती? कया सह तस्याः सम्बन्धः? तां दृष्ट्वा कथम् उदयनो व्यथितोऽभवत्? मिलनदृश्ये चित्रफलकवृत्तान्तस्य भूमिकामालोच्यताम्। 1+1+2+4

**Section – B**

**(Marks : 25)**

**Unit – I**

**3.** अधोलिखितयोः ***द्वयोः*** **संस्कृतभाषया देवनागरलिप्या** च टीका लेखनीया। 5×2

(a) नान्दी।

(b) विष्कम्भकः।

(c) सूत्रधारः।

(d) प्रस्तावना।

**Unit – II**

**4.** (a) अधोलिखितयोः कस्यचित् ***एकस्य*** मातृभाषया अनुवादः कार्यः। 5

(i) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति।।

(ii) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।।

(b) अधोलिखितयोः कस्यचित् ***एकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 6

(i) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।

(ii) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

(c) (i) कस्यचि**देकस्य** विग्रहवाक्यं प्रदाय समासनाम **संस्कृतभाषया देवनागरलिप्या** च लिख्यताम्। 2
शरपदनभयाद् 4(a)(i) प्रश्ने।
रूपोच्चयेन 4(b)(iii) प्रश्ने।

(ii) **संस्कृतभाषया देवनागरलिप्या** च कस्यचि**देकस्य** व्युत्पत्तिः निर्णेया। 1
पीड्यन्ते 4(a)(i) प्रश्ने।
सम्भवः 4(b)(i) प्रश्ने।

(iii) **संस्कृतभाषया देवनागरलिप्या** च कस्यचि**देकस्य** कारकविभक्तिः निर्णेया। 1
स्नेहात् 4.(a)(ii) प्रश्ने।
मानुषीषु 4.(b)(i) प्रश्ने।

**Section – C**

**(Marks : 15)**

**Unit – I**

5. अधोलिखितयोः कस्यचित् ***एकस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्।

(a) कासीत् सानुमती? कस्मिन्नेवाङ्के तस्याः प्रवेशः? कया विधया सा प्रच्छन्नाऽभवत्? सा कया प्रेरिता मर्त्यलोके? नाटके तस्याः आगमनवृत्तान्तं पर्यालोच्यताम्। 1+1+1+1+6

(b) कस्मिन्नङ्के धीवरवृत्तान्तं दृश्यते? किमर्थं वृत्तान्तमिदं समवतारितम्? तत्र कति चरित्राणि दृश्यन्ते? वृत्तान्ते प्रतिफलिता सामाजिकी व्यवस्था आलोच्यताम्। 1+2+2+5

***अथवा***

अधोलिखितेषु ***पञ्चप्रश्नाः*** समाधेयाः **सुरगिरा देवनागर्या** लिप्या च। 2×5

(a) हस्तिनापुरागतयोः कण्वशिष्ययोः नाम किम्?

(b) अभिज्ञानशकुन्तलनाटकस्य भरतवाक्ये कस्य स्तुतिर्विहिता?

(c) 'तापसवृद्धे' इति नाम्ना कस्याः सम्बोधनं केन कृतम्?

(d) कस्तावत् मातलिः? नाटके तस्य प्रवेशः कतिसंख्यके अङ्के दृश्यते?

(e) क एव धनमित्रः? तस्य उल्लेखः कथं कृतः राज्ञा?

(f) शकुन्तलां व्यतीत्य दुष्यन्तस्य पत्नीद्वयस्य नाम उल्लिख्यताम्।

(g) किमर्थं वसन्तोत्सवः राज्ये निषिद्धकृतः?

**Unit – II**

**6.** अधोलिखितेषु ***पञ्चानां*** प्राकृतशब्दानां संस्कृतरूपं **देवनागरलिप्या** लिख्यिताम्। 1×5

(a) अज्जउत्त।

(b) आणवेदि।

(c) वअस्स।

(d) भवं।

(e) अअं।

(f) एव्वं।

(g) होदु।